## सप्तमः पाठः

# सुविज्ञातमेव विश्वसेत्

कथाः प्रायः उपदेशात्मिकाः भवन्ति। एतासु सरलया रीत्या रोचकतया च विनोदशैल्या वा जीवनाय उपयोगिनः विचाराः व्यक्ताः भवन्ति। संस्कृतसाहित्ये कथासाहित्यस्य सुदीर्घा परम्परा वर्तते। संस्कृतकथा-कारेषु मूर्धन्यः नारायणपण्डितः अपि बालानां शिक्षायै हितोपदेशस्य रचनां कृतवान्। अत्राऽपि हितोपदेशात् सङ्कलिता एका कथा प्रस्तूयते।

अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान् पर्कटीवृक्षः। तस्य कोटरे दैवदुर्विपाकाद्गलितनख-नयनः जरद्गवनामा गृध्रः प्रतिवसति। अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात् किञ्चित्-किञ्चिदुद्धृत्य ददति। तेन असौ जीवति। अथ कदाचिद् दीर्घकर्णनामा मार्जारः पक्षिशावकान्भक्षितुं तत्रागतः। ततस्तमायान्तं दृष्ट्वा पक्षिशावकैर्भयार्तैः कोलाहलः कृतः। तच्छ्रुत्वा जरद्गवेनोक्तम् – कोऽयमायाति? दीर्घकर्णो गृध्रमवलोक्य सभयमाह – "हा हतोऽस्मि।" अधुनास्य सन्निधाने पलायितुमक्षमः। तद्यथा भवितव्यं तद्भवतु। तावद्विश्वासमुत्पाद्यास्य समीपं गच्छामि। इत्यालोच्यो-पसृत्याब्रवीत्-आर्य! त्वामभिवन्दे। गृध्रोऽवदत्-कस्त्वम् ? सोऽवदत्-मार्जारोऽहम्। गृध्रो ब्रूते-दूरमपसर, नो चेत् हन्तव्योऽसि मया। मार्जारोऽवदत्-श्रूयतां तावदस्मद्वचनम्। ततो यद्यहं वध्यस्तदा हन्तव्यः यतः –

**जातिमात्रेण किं कश्चित् हन्यते पूज्यते क्वचित्।**
**व्यवहारं परिज्ञाय वध्यः पूज्योऽथवा भवेत्॥**

गृध्रो ब्रूते- ब्रूहि किमर्थमागतोऽसि? सोऽवदत्-अहमत्र गङ्गातीरे नित्यस्नायी निरामिषाशी ब्रह्मचारी चान्द्रायणव्रतमाचरंस्तिष्ठामि। "यूयं धर्मज्ञानरता विश्वासभूमयः" इति पक्षिणः सर्वे सर्वदा ममाग्रे प्रस्तुवन्ति। अतो भवद्भ्यो विद्यावयोवृद्धेभ्यो धर्मं श्रोतुमिहागतः। भवन्तश्चैतादृशा धर्मज्ञा यन्मामतिथिं हन्तुमुद्यताः। गृहस्थ धर्मश्चैषः – यदि वा धनं नास्ति तदा प्रीतिवचसाप्यतिथिः पूज्य एव।

गृध्रोऽवदत्- "मार्जारो हि मांसरुचिः।" पक्षिशावकाश्चात्र निवसन्ति तेनाहमेवं ब्रवीमि। तच्छ्रुत्वा मार्जारो भूमिं स्पृष्ट्वा कर्णौ स्पृशति ब्रूते च –मया धर्मशास्त्रं श्रुत्वा वीतरागेणेदं दुष्करं व्रतं चान्द्रायणमध्यवसितम्। परस्परं विवदमानानामपि धर्मशास्त्राणाम् "अहिंसा परमो धर्मः" इत्यत्रैकमत्यम्।

एवं विश्वास्य स मार्जारस्तरुकोटरे स्थितः। ततो दिनेषु गच्छत्सु पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति। येषामपत्यानि खादितानि तैः शोकार्तैर्विलपद्भिरितस्ततो जिज्ञासा समारब्धा। तत्परिज्ञाय मार्जारः कोटरान्निःसृत्य बहिः पलायितः। पश्चात्पक्षिभिरितस्ततो निरूपयद्भिः तत्र तरुकोटरे शावकास्थीनि प्राप्तानि। अनन्तरं ते ऊचुः – "अनेनैव जरद्गवेनास्माकं शावकाः खादिताः" इति सर्वैः पक्षिभिर्निश्चित्य गृध्रो व्यापादितः अतोऽहं ब्रवीमि –

**अज्ञातकुलशीलस्य वासो देयो न कस्यचित्।**
**मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः॥**

## शब्दार्थः

| | | |
|---|---|---|
| पर्कटीवृक्षः | – | पाकड़ का वृक्ष |
| दैवदुर्विपाकात् | – | दुर्भाग्य से |
| किञ्चिदुद्धृत्य | – | थोड़ा–थोड़ा निकालकर |
| निरामिषाशी | – | मांस का भक्षण न करने वाला |
| विद्यावयोवृद्धेभ्यो | – | विद्या और अवस्था में बड़ों से |
| वीतरागेणेदम् | – | विषय वासना को छोड़ने के बाद |
| दुष्करम् | – | कठिन |
| चान्द्रायणव्रतम् | – | एक प्रकार का चन्द्रमा का व्रत |

## अभ्यासः

### (1) एकपदेन उत्तरं लिखत –

(क) पर्कटीवृक्षः कुत्र अस्ति ?

(ख) पक्षिशावकान् भक्षितुं कः आगतः ?

(ग) विश्वास्य मार्जारः कुत्र स्थितः ?

(घ) पक्षिशावकान् खादित्वा मार्जारः कुत्र गतः ?

(ङ) गृध्रः कैः हतः ?

### (2) एकवाक्येन उत्तरं लिखत –

(क) जरद्गवनामा गृध्रः कुत्र वसति ?

(ख) जनः वध्यः पूज्यः वा कथं भवति ?

(ग) कस्मै वासो न देयः ?

(घ) हितोपदेशस्य रचनाकारः कः ?

(ङ) कस्य दोषेण गृध्रः हतः ?

### (3) अधोलिखितप्रश्नानाम् उत्तराणि लिखत –

(क) मार्जारः गृध्रं कथं विश्वास्य तरुकोटरे स्थितः ?

(ख) कोटरे निवसन् मार्जारः किं करोति स्म ?

(ग) सुविज्ञातमेव विश्वसेत् कथायाः सारः कः ?

### (4) प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयत –

(क) गृध्रकूटनाम्नि . . . . . . . . . . . . . पर्कटीवृक्षः अस्ति। (पर्वते / गृहे)

(ख) वृक्षस्य कोटरे जरद्गवनामा . . . . . . . . . . . . . प्रतिवसति। (सिद्धः / गृध्रः)

(ग) मार्जारः प्रतिदिनम् . . . . . . . . . . . . . खादति। (पशुशावकम् / पक्षिशावकान्)

(घ) गृध्रः पक्षिशावकान् . . . . . . . . . . . . . । (रक्षति / भक्षति)

(ङ) पक्षिभिः . . . . . . . . . . . . . हतः। (मार्जारः / गृध्रः)

### (5) युग्ममेलनं कुरुत –

| | (अ) | (आ) |
|---|---|---|
| (क) | हितोपदेशः | गृध्रः |
| (ख) | जरद्गवनामा | मार्जारः |
| (ग) | दीर्घकर्णनामा | हानिः |
| (घ) | अज्ञाताय वासः | नारायणपण्डितः |

### (6) कोष्ठकात् उचितपदं चित्वा रेखाङ्कितपदैः प्रश्ननिर्माणं कुरुत –

(कैः, कस्य, के, कम्, केन)

**उदाहरणं यथा –**

**<u>अज्ञातः</u> अविश्वसनीयः भवति।**

**कः अविश्वसनीयः भवति ?**

(क) <u>मार्जारस्य</u> दोषेण गृध्रः हतः।

(ख) <u>पक्षिभिः</u> जरद्गवः हतः।

(ग) <u>व्यवहारेण</u> जनः पूज्यः भवति।

(घ) गृध्रः <u>मार्जारम्</u> उक्तवान्।

(ङ) <u>पक्षिणः</u> दुःखेन विलापं कृतवन्तः।

### (7) विपरीतार्थकशब्दानां मेलनं कुरुत –

| | (अ) | (आ) |
|---|---|---|
| (क) | दिनम् | अनेकता |
| (ख) | धर्मः | रात्रिः |
| (ग) | एकता | हिंसा |
| (घ) | अज्ञातः | अधर्मः |
| (ङ) | अहिंसा | ज्ञातः |

## ( 8 ) उदाहरणानुसारं धातुं प्रत्ययं च पृथक् कुरुत –

| दृष्ट्वा | – | दृश् + क्त्वा |
|---|---|---|
| हन्तव्यः | – | – – – – – – – – |
| हतः | – | – – – – – – – – |
| भक्षितुम् | – | – – – – – – – – |
| परिज्ञाय | – | – – – – – – – – |
| श्रोतुम् | – | – – – – – – – – |
| श्रुत्वा | – | – – – – – – – – |

## ( 9 ) उदाहरणानुसारं वर्तमानकालिकक्रियापदानां कालपरिवर्तनं कुरुत –

| गच्छति – | भविष्यकाले – | गमिष्यति |
|---|---|---|
| खादति – | भूतकाले – | – – – – – – – |
| भवति – | भविष्यकाले – | – – – – – – – |
| जीवति – | भूतकाले – | – – – – – – – |
| वसति – | भूतकाले – | – – – – – – – |
| ददाति – | भविष्यकाले – | – – – – – – – |

## ( 10 ) निम्नलिखितानि अव्ययानि प्रयुज्य वाक्यानि रचयत –

### उदाहरणं यथा –

**यदि – यदि पुस्तकम् अस्ति तर्हि पठतु।**

यदा – – – – – – – – – – – – – – – – – – ।

कदा – – – – – – – – – – – – – – – – – – ।

अथ – – – – – – – – – – – – – – – – – – ।

एव – – – – – – – – – – – – – – – – – – ।

इति – – – – – – – – – – – – – – – – – – ।

अपि – – – – – – – – – – – – – – – – – – ।

अत्र – – – – – – – – – – – – – – – – – – ।

## ( 11 ) निम्नलिखितशब्दानां द्विवचनं बहुवचनं च लिखत –

उदाहरणं यथा –

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| **महान्** | **महान्तौ** | **महान्तः** |
| मार्जारम् | - - - - - - - - | - - - - - - - - |
| तेन | - - - - - - - - | - - - - - - - - |
| पक्षी | - - - - - - - - | - - - - - - - - |
| तस्य | - - - - - - - - | - - - - - - - - |
| धनम् | - - - - - - - - | - - - - - - - - |
| धर्मः | - - - - - - - - | - - - - - - - - |
| जिज्ञासा | - - - - - - - - | - - - - - - - - |

### योग्यताविस्तारः –

- एवमेव अन्याः कथाः अन्वेषयत पठत च।

❖ ❖ ❖